# ॥ श्रीराजराजेश्वरी मन्त्रमातृकास्तवः ॥

This lovely hymn, though popular, is available mostly with ashuddha pATha. Here is a cleaner version corrected by Sri Harsha Ramamurthy. This hymn is recited by Upasakas of many popular Kaula lineages after Navavarana Puja, during Stava Parayana and during Samayika Puja - in a group. The followers of Dakshinachara/Keralachara, like in Sringeri Parampara, recite Lalita Stavaratna or Traipura Mahimna instead. This is not a rule but is followed traditionally.

कल्याणायुतपूर्णचन्द्रवदनां प्राणेश्वरानन्दिनीम्
पूर्णां पूर्णतरां परेशमिहिषीं पूर्णामृतास्वादिनीम् ।
सम्पूर्णां परमोत्तमामृतकलां विद्यावतीं भारतीम्
श्रीचक्रप्रियबिन्दुतर्पणपरां श्रीराजराजेश्वरीम् ॥१ ॥

एकारादिसमस्तवर्णविविधाकारैकचिद्रूपिणीम्
चैतन्यात्मकचक्रराजनिलयां चन्द्रान्तसञ्चारिणीम् ।
भावाभावविभाविनीं भवपरां सद्भक्तिचिन्तामणिम्
श्रीचक्रप्रियबिन्दुतर्पणपरां श्रीराजराजेश्वरीम् ॥२ ॥

ईहाधिक्परयोगिवृन्दविदितां स्वानन्दभूतां पराम्
पश्यन्तीं तनुमध्यमां विलसिनीं श्रीवैखरीरूपिणीम् ।
आत्मानात्मविचारिणीं विवरगां विद्यां त्रिबीजात्मिकाम्
श्रीचक्रप्रियबिन्दुतर्पणपरां श्रीराजराजेश्वरीम् ॥३ ॥

लक्ष्यालक्ष्यनिरीक्षणां निरुपमां रुद्राक्षमालाधराम्
त्र्यक्षार्धाकृतिदक्षवंशकलिकां दीर्घाक्षिदीर्घस्वराम् ।
भद्रां भद्रवरप्रदां भगवतीं भद्रेश्वरीं मुद्रिणीम्
श्रीचक्रप्रियबिन्दुतर्पणपरां श्रीराजराजेश्वरीम् ॥४ ॥

ह्रींबीजागतनादबिन्दुभरितामोङ्कारनादात्मिकाम्
ब्रह्मानन्दघनोदरीं गुणवतीं ज्ञानेश्वरीं ज्ञानदाम् ।
ज्ञानेच्छाकृतिनीं महीं गतवतीं गन्धर्वसम्सेविताम्
श्रीचक्रप्रियबिन्दुतर्पणपरां श्रीराजराजेश्वरीम् ॥५ ॥

हर्षोन्मत्तसुवर्णपात्रभरितां पीनोन्नताघूर्णिताम्
हुङ्कारप्रियशब्दजालनिरतां सारस्वतोल्लासिनीम् ।
सारासारविचारचारुचतुरां वर्णाश्रमाकारिणीम्
श्रीचक्रप्रियबिन्दुतर्पणपरां श्रीराजराजेश्वरीम् ॥६ ॥

सर्वेशाङ्गविहारिणीं सकरुणां सन्नादिनीं नादिनीम्
संयोगप्रियरूपिणीं प्रियवतीं प्रीतां प्रतापोन्नताम् ।
सर्वान्तर्गतशालिनीं शिवतनूसन्दीपिनीं दीपिनीम्

श्रीचक्रप्रियबिन्दुतर्पणपरां श्रीराजराजेश्वरीम् ॥७ ॥

कर्माकर्मविवर्जितां कुलवतीं कर्मप्रदां कौलिनीम्
कारुण्याम्बुधिसर्वकामनिरतां सिन्धुप्रियोल्लासिनीम् ।
पञ्चब्रह्मसनातनासनगतां गेयां सुयोगान्विताम्
श्रीचक्रप्रियबिन्दुतर्पणपरां श्रीराजराजेश्वरीम् ॥८ ॥

हस्त्युत्कुम्भनिभस्तनद्वितयतः पीनोन्नतादानताम्
हाराद्याभरणां सुरेन्द्रविनुतां शृङ्गारपीठालयाम् ।
योन्याकारकयोनिमुद्रितकरां नित्यां नवार्णात्मिकाम्
श्रीचक्रप्रियबिन्दुतर्पणपरां श्रीराजराजेश्वरीम् ॥९ ॥

लक्ष्मीलक्षणपूर्णभक्तवरदां लीलाविनोदस्थिताम्
लाक्षारञ्जितपादपद्मयुगलां ब्रह्मेन्द्रसंसेविताम् ।
लोकालोकितलोककामजननीं लोकाश्रयाङ्कस्थिताम्
श्रीचक्रप्रियबिन्दुतर्पणपरां श्रीराजराजेश्वरीम् ॥१० ॥

ह्रीङ्काराश्रितशङ्करप्रियतनुं श्रीयोगपीठेश्वरीम्
माङ्गल्यायुतपङ्कजाभनयनां माङ्गल्यसिद्धिप्रदाम् ।

तारुण्येन विशेषिताङ्गसुमहालावण्यसंशोभिताम्
श्रीचक्रप्रियबिन्दुतर्पणपरां श्रीराजराजेश्वरीम् ॥११ ॥

सर्वज्ञानकलावतीं सकरुणां सर्वेश्वरीं सर्वगाम्
सत्यां सर्वमयीं सहस्रदलगां सत्त्वार्णवोपस्थिताम् ।
सङ्गासङ्गविवर्जितां सुखकरीं बालार्ककोटिप्रभाम्
श्रीचक्रप्रियबिन्दुतर्पणपरां श्रीराजराजेश्वरीम् ॥१२ ॥

कादिक्षान्तसुवर्णबिन्दुसुतनुं सर्वाङ्गसंशोभिताम्
नानावर्णविचित्रचित्रचरितां चातुर्यचिन्तामणिम् ।
चित्तानन्दविधायिनीं सुचपलां कूटत्रयाकारिणीम्
श्रीचक्रप्रियबिन्दुतर्पणपरां श्रीराजराजेश्वरीम् ॥१३ ॥

लक्ष्मीशानविधीन्द्रचन्द्रमकुटाद्यष्टाङ्गपीठश्रिताम्
सूर्येन्द्वग्निमयैकपीठनिलयां त्रिस्थां त्रिकोणेश्वरीम् ।
गोप्त्रीं गर्वनिगर्वितां गगनगां गङ्गागणेशप्रियाम्
श्रीचक्रप्रियबिन्दुतर्पणपरां श्रीराजराजेश्वरीम् ॥१४ ॥

ह्रींकूटत्रयरूपिणीं समयिनीं संसारिणीं हंसिनीम्

वामाराध्यपदाम्बुजां सुकुलजां बीजावतीं मुद्रिणीम् ।

कामाक्षीं करुणार्द्रचित्तसहितां श्रीं श्रीत्रिमूर्त्यम्बिकाम्

श्रीचक्रप्रियबिन्दुतर्पणपरां श्रीराजराजेश्वरीम् ॥१५ ॥

या विद्या शिवकेशवादिजननी या वै जगन्मोहिनी

या ब्रह्मादिपिपीलिकान्तजगदानन्दैकसन्दायिनी ।

या पञ्चप्रणवद्विरेफनलिनी या चित्कलामालिनी

सा पायात्परदेवता भगवती श्रीराजराजेश्वरी ॥१६

Sri Kamakoti Mandali [srigurupaduka@yahoo.com]